# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गाष्टोत्तरशतनामस्तोत्रम्

॥ ॐ ॥

॥ श्री दुर्गायै नमः ॥

अथ श्रीदुर्गाष्टोत्तरशतनामस्तोत्रम् ।

ईश्वर उवाच ।

शतनाम प्रवक्ष्यामि , शृणुष्व कमलानने ।
यस्य प्रसादमात्रेण , दुर्गा प्रीता भवेत् सती ॥ 1॥

ॐ सती साध्वी भवप्रीता, भवानी भवमोचनी ।
आर्या दुर्गा जया चाद्या, त्रिनेत्रा शूलधारिणी ॥ 2॥

पिनाकधारिणी चित्रा, चण्डघण्टा महातपाः ।
मनो बुद्धिरहङ्कारा, चित्तरूपा चिता चितिः ॥ 3॥

सर्वमन्त्रमयी सत्ता, सत्यानन्दस्वरूपिणी ।
अनन्ता भाविनी भाव्या, भव्याभव्या सदागतिः ॥ 4॥

शाम्भवी देवमाता च, चिन्ता रत्नप्रिया सदा ।

सर्वविद्या दक्षकन्या,  दक्षयज्ञविनाशिनी ॥ 5॥

अपर्णानेकवर्णा च,  पाटला पाटलावती ।
पट्टाम्बर परीधाना,  कलमञ्जीररञ्जिनी ॥ 6॥

अमेयविक्रमा क्रूरा, सुन्दरी सुरसुन्दरी ।
वनदुर्गा च मातङ्गी, मतङ्गमुनिपूजिता ॥ 7॥

ब्राह्मी माहेश्वरी चैन्द्री, कौमारी वैष्णवी तथा ।
चामुण्डा चैव वाराही, लक्ष्मीश्च पुरुषाकृतिः ॥ 8॥

विमलोत्कर्षिणी ज्ञाना, क्रिया नित्या च बुद्धिदा ।
बहुला बहुलप्रेमा, सर्ववाहनवाहना ॥ 9॥

निशुम्भशुम्भहननी,  महिषासुरमर्दिनी ।
मधुकैटभहन्त्री च,  चण्डमुण्डविनाशिनी ॥ 10॥

सर्वासुरविनाशा च,  सर्वदानवघातिनी ।
सर्वशास्त्रमयी सत्या,  सर्वास्त्रधारिणी तथा ॥ 11॥

अनेकशस्त्रहस्ता च,  अनेकास्त्रस्य धारिणी ।
कुमारी चैककन्या च,  कैशोरी युवती यतिः ॥ 12॥

अप्रौढा चैव प्रौढा च,  वृद्धमाता बलप्रदा ।

महोदरी मुक्तकेशी , घोररूपा महाबला ॥ 13॥

अग्निज्वाला रौद्रमुखी, कालरात्रिस्तपस्विनी ।
नारायणी भद्रकाली, विष्णुमाया जलोदरी ॥ 14॥

शिवदूती कराली च , अनन्ता परमेश्वरी ।
कात्यायनी च सावित्री, प्रत्यक्षा ब्रह्मवादिनी ॥ 15॥

य इदं(म्) प्रपठेन्नित्यं(न्), दुर्गानामशताष्टकम् ।
नासाध्यं(वँ) विद्यते देवि, त्रिषु लोकेषु पार्वति ॥ 16॥

धनं(न्) धान्यं(म्) सुतं(ञ्) जायां(म्) , हयं(म्) हस्तिनमेव च ।
चतुर्वर्गं(न्) तथा चान्ते, लभेन्मुक्तिं(ञ्) च शाश्वतीम् ॥ 17॥

कुमारीं(म्) पूजयित्वा तु, ध्यात्वा देवीं(म्) सुरेश्वरीम् ।
पूजयेत् परया भक्त्या, पठेन्नामशताष्टकम् ॥ 18॥

तस्य सिद्धिर्भवेद् देवि, सर्वैः(स्) सुरवरैरपि ।
राजानो दासतां(यँ) यान्ति, राज्यश्रियमवाप्नुयात् ॥ 19॥

गोरोचनालक्तककुङ्कुमेव
सिन्दूरकर्पूरमधुत्रयेण ।
विलिख्य यन्त्रं(वँ) विधिना विधिज्ञो
भवेत् सदा धारयते पुरारिः ॥ 20॥

भौमावास्यानिशामग्रे,  चन्द्रे शतभिषां(ङ्) गते ।
विलिख्य प्रपठेत् स्तोत्रं(म्) स , भवेत् सम्पदां(म्) पदम् ॥ 21॥

॥ इति श्रीविश्वसारतन्त्रे दुर्गाष्टोत्तरशतनामस्तोत्रं(म्) समाप्तम् ॥

